|| শ্রী ||
অথ শ্রী ত্রিবিক্রমপংডিতাচার্য়সুত শ্রী নারায়ণপংডিতাচার্য়বিরচিতঃ
|| শ্রী মধ্ববিজয়ঃ ||
১৩. ত্রয়োদষঃ সর্গঃ
পৃথুদর্শনমুত্থিতং কৃতার্থং পৃথিবীভৃৎপ্রণতিং গৃহীতবংতম |
নিজশিষ্যমুদেঽথ সহ্যমাপ্তং পুরুষঃ কশ্চিদুপায়য়ৌ কদাচিত || ১৩.১ ||

ভগবানিহ নঃ স্বকিংকরাণাং অচিরেণাঽব্রজতাদনুগ্রহায় |
ইতি কার্য়চিকীর্ষয়াঽঽর্থয়ত ত্বাং নৃপ ইত্যভ্যধিতৈষ তং প্রণম্য || ১৩.২ ||

অথ মাঘবতীমপাস্য কাষ্ঠাং ব্রজতা প্রৈধিততেজসা প্রতীচীম |
পরিশোধয়তা স্বপাদসংগাত পৃথিবীং প্রাজ্ঞদিবাকরেণ রেজে || ১৩.৩ ||

অশুভানপহায় মায়িজুষ্টান অধমাদ্রীনিব গোত্রনিম্নগৌঘৈঃ |
সুজনৈস্তরসাঽভিগম্যমানঃ পরমস্নেহতয়া ক্রমপ্রসন্নৈঃ || ১৩.৪ ||

সুমনঃফলশোভিনোঽত্র পুংসো নময়ন গোভিরনোকহানিবোচ্চান |
অপি ভংগমুপানয়ন্ননম্রান দৃঢভাবাদপরানবার্য়বীর্য়ঃ || ১৩.৫ ||

গমনোৎসববিস্মিতৈর্নিষেব্যো বিবিধৈর্জনপদৈর্জনৈরজস্রম |
পরিসৃত্বরকীর্তিরার্তিমুক্ত্যৈ পুরুষৈর্দূরভুবশ্চ গম্যমানঃ || ১৩.৬ ||

অমরৈরমরানুগৈর্মুনীংদ্রৈঃ অপরেক্ষাবিষয়ৈশ্চ সেব্যমানঃ |
হরিপাদসরোজসংগসারো ভুবনে পাবনপাবনো নিকামম || ১৩.৭ ||

অয়মপ্রতিবারণঃ প্রয়াণে পরমানংদসুতীর্থসূরিরাজঃ |
বিবভাবতিবেলমচ্চরূপঃ সুরসিংধোরিব সংততপ্রবাহ ঃ || ১৩.৮ ||

সময়েন গতোঽমহীয়সাঽসৌ বিষয়ং স্তংভপদোপসর্জনাখ্যম |
মদনাধিপতেঃ সুধাম ধাম প্রবিবেশাখিললোকবংদনীয়ম || ১৩.৯ ||

ক্ষণদামিহ তাবদূষিবাংসং বিহিতাহর্মুখয়োগ্যয়োগমেনম |
গমনোদ্যমলক্ষণৈরজানন গমনায়োদ্যতমাশু শিষ্যসংঘাঃ || ১৩.১০ ||

পুরতো বিসৃতাঃ সমাধিশুদ্ধ্যৈ য়তয়স্তত্র পটীঃ কষায়বেষাঃ |
সহসোদহরন স্বয়োগ্যমুদ্রায়ুতদংডাদিকধারণোদ্যমেন || ১৩.১১ ||

অবধার্য় বিশেষকারিশংখপ্রকটাংকান সুধিয়া গতার্দ্রভাবান |
লসিতা তুলসীস্রগস্য কংঠে হরিনির্মাল্যতয়োচিতা ন্যধায়ি || ১৩.১২ ||

য়তধীর্গুরুচক্রিমূর্তিপূর্ণং য়তনিশ্বাসবচা বিশোধ্য পাণী |
গুণকুংডলমংডিতং বিমানং গুণবংধং কবচাবৃতং বভার || ১৩.১৩ ||

সকমংডলুমংডলাবলংবং স্বয়মেবালঘুপুস্তকাদিভারম |
য়ুবশিষ্যগণো দধে নয়ত্রাত হি দাক্ষ্যস্য গুণোঽপরোঽস্তি || ১৩.১৪ ||

অতিসংভ্রমতঃ পরিভ্রমংতং ভরদামানবলোকিনং চিরায় |
অনুয়োগপরং মুহুঃ প্রমত্তং জহসুর্নূতনশিষ্যমত্র কেচিত || ১৩.১৫ ||

অথ তৎক্ষণঘট্টিতোরুঘংটাঘননাদব্যপদেশতঃ পরেণ |
অমিতপ্রমতিঃ প্রচোদিতোঽসৌ ইতি নির্য়ৎসু নিজেষু নির্জগাম || ১৩.১৬ ||

ধৃতমাতপবারণং বরেণ্যং ব্রতিরাজং তমুপর্য়ুপর্য়ুদারম |
উদয়ন্মিহিরোপরিষ্ঠপূর্ণদ্বিজরাজশ্রিয়মায়য়াবভূতাম || ১৩.১৭ ||

ভুবনত্রয়ধারিণং মুকুংদং দধদংতঃ স দধে গুরুঃ স্বয়ং চ |
অপি কেনচিদিত্যদো ন চিত্রং ননু স প্রাণপতির্বভার তং চ || ১৩.১৮ ||

য়তয়ো গৃহিণোঽথ বর্ণিমুখ্যাঃ শ্রুতিগাস্ত্যক্তনিষিদ্ধকাম্যভাবাঃ |
ইহ মূর্তিধরা ইব স্বধর্মাঃ শতসংখ্যাঃ শতসংখ্যমন্বগচ্চন || ১৩.১৯ ||

পরিবারজনা ন মার্গদুঃখং প্রয়য়ুঃ পূরুষরত্নমীক্ষমাণাঃ |
ইতি নাদ্ভুতমস্য হি প্রয়াংতি স্মৃতিমাত্রাদ ভবিনো ভবাপবর্গম || ১৩.২০ ||

মদনেশ্বরবল্লভপ্রদেশে প্রভুমায়াংতমথাভ্যপদ্যত দ্রাক |
জয়সিংহ ইমং নৃসিংহবর্য়ঃ শুভধীঃ স্তংভবিশিষ্টসিংহনামা || ১৩.২১ ||

অবতীর্য় পুরৈব বাহনাত স্বাদ অপি মার্গাদপসার্য় সৈনিকান সঃ |
সহ কৈশ্চন ভূসুরৈরবাপ্তঃ ত্রিজগৎপূজ্যপদাংতিকে ননাম || ১৩.২২ ||

পৃথিবীপতিনাঽনুগম্যমানো বিনয়াদ ভক্তিরসার্দ্রমানসেন |
অচিরেণ স বিষ্ণুমংগলস্য প্রয়য়াবায়তনোত্তমস্য পার্শ্বম || ১৩.২৩ ||

নরদেবদিদৃক্ষয়া সমেতা উভয়গ্রামজনা জনাঃ পরে চ |
উপয়াংতমনংতমানসং তং মুহুরৈক্ষংত কুতূহলাব্ধিমগ্নাঃ || ১৩.২৪ ||

পুরতো মধুরস্বনৈর্বদদ্ভিঃ স্বকৃতাঃ কর্ণসুখা মুকুংদগাথাঃ |
ধৃতপংকজবীজচক্রচিহ্নৈঃ কৃত নৃত্তৈশ্চতুরৈর্নিষেব্যমাণম || ১৩.২৫ ||

কলিতাংজলিনা স্ফুটানুয়াতং জনসংবাধসহেন ভূমিভর্ত্রা |
করুণাবিষয়ং চিকীর্ষুণা স্বং ব্রজতা কিংকরতামকৈতবেন || ১৩.২৬ ||

ইদমিত্থমিতীক্ষণৈর্নরাণাং অপরিচ্ছেদ্যমহিষ্ঠধামরূপম |
অধিকং ধরণীমলং চিকীর্ষুং স্ফুটমুদ্যংতমিব দ্যুনাথমন্যম || ১৩.২৭ ||

অশনৈঃ শনকৈরিবাঽব্রজংতং য়ুবসিংহপ্রবরপ্রগল্ভয়ানম |
অতিপাটলপাদপল্লবাভ্যাং অবনীং পাবনতামলং নয়ংতম || ১৩.২৮ ||

নখনির্জিতপদ্মরাগরাগং বরকূর্মপ্রপদং নিগূঢগুল্ফম |
সুরবর্য়করাগ্রসেব্যজংঘং দ্বিরদোদারকরোপমোরুয়ুগ্মম || ১৩.২৯ ||

শুভশুদ্ধনিতংববিংবরাজন্নবকৌশেয়বিশেষবাহ্যবস্ত্রম |
তনুকুক্ষিগলালিকেষু রেখাত্রিতয়েন প্রকটেন শোভমানম || ১৩.৩০ ||

মৃদুসূক্ষ্মঘনারুণাবিকাচ্ছপ্রকটপ্রাবরণেন ভাসমানম |
অতিনূতনতিগ্মভানুভাসাং নিকরেণেব সুবর্ণসানুমংতম || ১৩.৩১ ||

পৃথুবক্ষসমুন্নতাংসভিত্তিং গুরুবৃত্তায়তহৃদ্যবাহুদংডম |
পরমারুণপাণিপল্লবাংতঃ স্ফুরিতোর্ধ্বধ্বজলাংছনাদিমংতম || ১৩.৩২ ||

পরিপূর্ণশশাংকবিংবশংকাবিষয়ং প্রাক সহসাঽবলোকনেন |
অকলংকতয়া পরং বিবিক্তং বদনং বিভ্রতমচ্ছবিভ্রমাঢ্যিম || ১৩.৩৩ ||

অতিসুংদরমংদহাসরাজন্নবকুংদাভরদং শুভারুণোষ্ঠম |
কমলায়তলোচনাবলোকৈঃ অপি লোকান সকলান প্রহর্ষয়ংতম || ১৩.৩৪ ||

অতিভাসুরকর্ণভাসিতশ্রীতুলসীগুচ্ছমতুচ্ছকাংতিগংডম |
ভুবনত্রয়ভৃত্যভূতিদানে চতুরভ্রূবরবিভ্রমং সুমৌলিম || ১৩.৩৫ ||

সকলাবয়বান স্ফুটং মিমানাঃ প্রতিমালক্ষণলক্ষণায় লক্ষ্যম |
চতুরা বিদধুর্যদীয়গাত্রং স সুলক্ষ্মেত্যধুনা নিগদ্যতে নো || ১৩.৩৬ ||

অতিলোলদৃশাং সমীক্ষিতুং স্বং জনসংবাধভয়েন দূরভাজাম |
সমদর্শয়দূর্ধ্বমোরসোঽসৌ দয়য়ৈবোরুজনৌঘমধ্যগোঽপি || ১৩.৩৭ ||

সবিকাসদৃশাং কৃতাংজলীনাং জনতানাং পরমাদরান্নতানাম |
বলয়েন বৃতঃ প্রিয়ং মুরারেঃ প্রবিবেশাঽয়তনং প্রবর্হবোধঃ || ১৩.৩৮ ||

বিবিধপ্রভুমধ্যসন্নিষণ্ণো নরদেবেন সমং স গূঢদেবঃ |
বিবভাবুডুরাডিবোডুমধ্যে সহ মহ্যাস্তনয়েন পূর্ণবিংবঃ || ১৩.৩৯ ||

অবদত স কথাং রথাংগপাণেঃ ভগবান ভাগবতে ভবাপ হংত্রীম |
অনুকূলগুণস্বরাদিভাজা নিজশিষ্যপ্রবরেণ বাচ্যমানে || ১৩.৪০ ||

কথনং তদুদারধৈর্য়সারং মধুরং পুষ্কলভাববত প্রসন্নম|
বিদুষোঽবিদুষোঽপি শৃণ্বতোঽলং ব্যধিতাঽনংদরসাংবুধৌ নিমগ্নান || ১৩.৪১ ||

গমনাসনসংকথাদিলীলাঃ স্মৃতিমাত্রেণ ভবাপবর্গদাত্রীঃ |
কথমপ্যমরাঃ প্রপংচয়েয়ুঃ ননু মধ্বস্য ন মাদৃশোঽল্পবোধাঃ || ১৩.৪২ ||

সুতপঃকবিতাদিসদ্গুণানাং লিকুচানাং কুলজোঽ◌ংগিরোন্বয়ানাম |
অভবদ গুহনামকো বিপশ্চিত কবিবর্য়োঽখিলবাদিবংদনীয়ঃ || ১৩.৪৩ ||

দয়িতাঽস্য সতী গুণানুরূপা বিধিবীর্য়েণ মুহুর্মৃতপ্রজাঽপি |
অভজদ্ভুবনপ্রভূ হরীশৌ সুতকামা বসুদেবসূনুভক্তা || ১৩.৪৪ ||

পরমেশ্বরয়োঃ প্রসাদয়োগাত সুতরত্নং তদসূত সূরিপত্নী |
পরিষৎপদপট্টনেষু নার্ঘো বিবিদে য়স্য সমঃ পরীক্ষকাগ্র্যেঃ || ১৩.৪৫ ||

বদনেংদুমবেক্ষ্য নংদনস্য স্বকুলোত্তারণদক্ষলক্ষণস্য |
কৃতকৃত্যতয়া ক্রিয়াঃ প্রকুর্বন কবিরাখ্যাদুচিতাং ত্রিবিক্রমাখ্যাম || ১৩.৪৬ ||

কলভাষণ এব সূরিপোতঃ কবিরাসীদনবদ্যপদ্যবাদী |
অবভাতি ননু প্রভাপ্রভাবী ভগবান বালতরোঽপি তিগ্মভানুঃ || ১৩.৪৭ ||

www.yousigma.com

সকলাংগয়ুতাবভাতশাখঃ সময়ে প্রাপ্ত উদারপক্ষিসেব্যঃ |
স সসর্জ সদধ্বগোপকৃত্যৈ লিকুচঃ কাব্যফলং রসাভিরামম || ১৩.৪৮ ||

প্রতিপাদিতমাত্মনা য়থার্থং পৃথুমায়াসময়স্য দুর্ঘটত্বম |
স্বগুরৌ পরিহর্তুমক্ষমেঽপি শ্রুতবাংস্তং স বয়স্যবোধিতোঽলম || ১৩.৪৯ ||

ভগবত্যুদিতে সগোবিলাসে বটুভাবং ত্যজতি ত্রিবিক্রমাখ্যে |
অপি ভানুপুরস্সরাঃ সমস্তাঃ প্রয়য়ুঃ কীটমণিপ্রভত্বমাষু || ১৩.৫০ ||

অতিদক্ষমতিং সপাদলক্ষে সময়ে মায়িজনস্য য়ুক্তিশূরম |
মহিতং হি মহীতলে মহিম্না জনকো নংদনমব্রবীদুপাংশু || ১৩.৫১ ||

শৃণু বাচমিমাং বিচারিতার্থাং ন কলৌ নির্গুণভাবনা সুখায় |
ইতি গৌণবিমুক্তয়ে গুণাঢ্যং ভজ দেবং বসুদেবসূনুমেব || ১৩.৫২ ||

ইতি তাতবচো নিশম্য কিংচিত তরলাত্মাঽপি বিচার্য় শাস্ত্রসারম|
পরমেব স পারমারুরুক্ষুঃ বিগুণোঽপাস্তিমুপাশৃণোত পরেভ্যঃ || ১৩.৫৩ ||

নিজধর্মরতো গৃহিপ্রবর্হঃ কলিকালাকুলিতাংতরোঽপি হংত |
নিতরাং নিষিতাত্মনা নিসর্গাত স্ফুটমালোচয়দিত্যসৌ কদাচিত || ১৩.৫৪ ||

রচিতং ননু সূত্রমত্র মানং বিদুষা সত্যবতীসুতেন সাক্ষাত |
অপরস্পরসংগতানি ভাষ্যাণ্যপি সর্বাণি ন মানতাং ব্রজেয়ুঃ || ১৩.৫৫ ||

য়দি তেষু নিরাগ্রহাংতরাঃ স্মঃ সুঘটং নোপলভামহে হি কিংচিত |
ন তথাঽপি পরংপরোপয়াতং ন পঠামঃ প্রণয়েন শাংকরীয়ম || ১৩.৫৬ ||

ঘটনোপনিষৎসু নাল্পবুদ্ধেঃ সুঘটেত্যভ্যুপগম্য চিংতয়ামঃ |
ন বিমুক্তিমুপৈতি কোঽপি মুক্ত্বা সময়োক্তামিহ য়ামিমামুপাস্তিম || ১৩.৫৭ ||

বিততঃ সুখসচ্চিদদ্বয়াত্মা সমুপাস্যো বিহিতো হি তত্ত্ববিদ্ভিঃ |
স চ নাবয়বী নিরূপ্যতে চেদ দ্যুতিমাত্রং চ ন হীত্যদো রহস্যম || ১৩.৫৮ ||

য়দি চেদৃগুপাস্যতেঽস্য রূপং তিমিরত্বেন বিভাতি পারিশেষ্যাত |
ফলমপ্যথ মুক্তিরীদৃশী স্যাদ ইতি নো নৈব ধিনোত্যুপাস্তিরেষা || ১৩.৫৯ ||

অথ বেদপুরাণভারতানি স্বয়মালোচ্য য়থাববোধমত্র |
গুণবংতমুপাস্মহে মুকুংদং স্মৃতিধর্মান স্ফুটমাচরংত এব |১৩.৬০ ||

অবধার্য় য়দেতিকার্য়মার্য়ঃ স বিবেকাদুপচক্রমে বিধাতুম|
পরিপূর্ণমতের্জগৎসু কীর্তিং পরিপূর্ণামশৃণোত তদা বিশুদ্ধাম || ১৩.৬১ ||

বিহিনস্তি হি নো জনোঽতিবাগ্মী সময়ং কোঽপি পরংপরোপয়াতম |
ক্ষিপ তং ত্বমুদারয়ুক্তিশূরো ন পরে তত্র সমর্থতাং ব্রজেয়ুঃ || ১৩.৬২ ||

তব বেদনদীর্বিগাহ্য ভূয়ঃ সময়াংভোধিষু কুর্বতো বিহারম |
নবকাব্যরসপ্রিয়স্য বাদিদ্বিরদেংদ্র প্রতিবারণো ন জজ্ঞে || ১৩.৬৩ ||

উপয়াহি য়শঃ শশাংকগৌরং নিজয়ূথস্য ভয়ং নিরাকুরু ত্বম |
অধুনা বিধিনোপপাদিতং তং প্রতিবাদিপ্রতিবারণং নিবার্য় || ১৩.৬৪ ||

ইতি মায়িজনেন তত্রতত্র স্বজনত্বেন স তাবদর্থ্যমানঃ |
অনুকূলবচা মহিষ্ঠমানো মনসা সংশয়মাপ সংশয়চ্ছিত || ১৩.৬৫ ||

শিতমধ্ববচঃ সৃণিপ্রয়োক্তৃন পুরুষানেষ বিষাদয়ন কবীভঃ |
বিবিধোত্তরধূলিপাতনেন প্রতিঘেনাধিকমংধয়াংচকার || ১৩.৬৬ ||

ক্ষণদাসু বিচক্ষণঃ স বীক্ষ্য প্রচুরপ্রজ্ঞ্মনোজ্ঞশাস্ত্রসারম |
অপরাবিদিতঃ প্রসাদগর্ভং বিদধে বিস্ময়মাংতরং মহাংতম || ১৩.৬৭ ||

বিদিতবান ব্যবহৃত্য সুদর্শনং বহলবোধমবেক্ষ্য স নিশ্চয়াত |
অপি ন তস্য মতং সহসাঽঽদদে ননু বিমৃশ্য কৃতী কুরুতেঽখিলম || ১৩.৬৮ ||

তং বিশ্ণুমংগলগতং বহলপ্রবোধং প্রাপ্যাভ্যবংদত তদাঽয়ুগবিক্রমার্য়ঃ|
আনংদদং স চতুরাননহাসলক্ষ্মা তত্ত্বং প্রবেত্তুমমরেংদ্র ইবাব্জয়োনিম || ১৩.৬৯
||

|| ইতি শ্রীমৎকবিকুলতিলক ত্রিবিক্রমপংডিতাচার্য়সুত
শ্রীনারায়ণপংডিতাচার্য়বিরচিতে শ্রীমধ্ববিজয়ে
আনংদাংকিতে ত্রয়োদশঃ সর্গঃ ||